श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १

*भगवन्महिमानुवर्णनम्*

सान्द्रानन्दावबोधात्मकमनुपमितं कालदेशावधिभ्यां
  निर्मुक्तं नित्यमुक्तं निगमशतसहस्रेण निर्भास्यमानम्।
अस्पष्टं दृष्टमात्रे पुनरुरुपुरुषार्थात्मकं ब्रह्म तत्वं
  तत्तावद्भाति साक्षाद्गुरुपवनपुरे हन्त भाग्यं जनानाम्॥ १ ॥

एवं दुर्लभ्यवस्तुन्यपि सुलभतया हस्तलब्धे यदन्यत्
  तन्वा वाचा धिया वा भजति बत जनः क्षुद्रतैव स्फुटेयम्।
एते तावद्वयं तु स्थिरतरमनसा विश्वपीडापहत्यै
  निश्शेषात्मानमेनं गुरुपवनपुराधीशमेवाश्रयामः॥ २ ॥

सत्त्वं यत्तत् पराभ्यामपरिकलनतो निर्मलं तेन तावद्
  भूतैर्भूतेन्द्रियैस्ते वपुरिति बहुशः श्रूयते व्यासवाक्यम्।
तत् स्वच्छत्वाद्यदच्छादितपरसुखचिद्गर्भनिर्भासरूपं
  तस्मिन् धन्या रमन्ते श्रुतिमतिमधुरे सुग्रहे विग्रहे ते॥ ३ ॥

निष्कम्पे नित्यपूर्णे निरवधिपरमानन्दपीयूषरूपे
  निर्लीनानेकमुक्तावलिसुभगतमे निर्मलब्रह्मसिन्धौ।
कल्लोलोल्लासतुल्यं खलु विमलतरं सत्वमाहुस्तदात्मा
  कस्मान्नो निष्कळस्त्वं सकळ इति वचस्त्वत्कलास्वेव भूमन्॥ ४ ॥

निर्व्यापारोऽपि निष्कारणमज भजसे यत्क्रियामीक्षणाख्यां
  तेनैवोदेति लीना प्रकृतिरसति कल्पाऽपि कल्पादिकाले।
तस्यास्संशुद्धमंशं कमपि तमतिरोधायकं सत्त्वरूपं
  स त्वं धृत्वा दधासि स्वमहिम विभवाकुण्ठ वैकुण्ठ रूपम्॥ ५ ॥

तत्ते प्रत्यग्रधाराधरललितकलायावलीकेलिकारं
    लावण्यस्यैकसारं सुकृति जन दृशां पूर्णपुण्यावतारम्।
लक्ष्मीनिश्शङ्कलीलानिलयनममृतस्यन्दसन्दोहमन्तः
    सिञ्चत्सञ्चिन्तकानां वपुरनुकलये मारुतागारनाथ॥ ६ ॥

कष्टा ते सृष्टिचेष्टा बहुतरभवखेदावहा जीवभाजा-
    मित्येवं पूर्वमालोचितमजित मया नैवमद्याभिजाने।
नो चेज्जीवाः कथं व मधुरतरमिदं त्वद्वपुश्चिद्रसार्द्रं
    नेत्रैः श्रोत्रैश्च पीत्वा परमरससुधांभोधिपूरे रमेरन्॥ ७ ॥

नम्राणां सन्निधत्ते सततमपि पुरस्तैरनभ्यर्थितान-
    प्यर्थान् कामानजस्रं वितरति परमानन्दसान्द्रां गतिं च।
इत्थं निश्शेषलभ्यो निरवधिक फलः पारिजातो हरे त्वं
    क्षुद्रं तं शक्रवाटीद्रुममभिलषति व्यर्थमर्थिव्रजोऽयम्॥ ८ ॥

कारुण्यात्काममन्यं ददति खलु परे स्वात्मदस्त्वं विशेषा-
    दैश्वर्यादीशतेऽन्ये जगति परजने स्वात्मनोऽपीश्वरस्त्वम्।
त्वय्युच्चैरारमन्ति प्रतिपदमधुरे चेतनाः स्फीतभाग्या-
    स्त्वं चाऽऽत्माराम एवेत्यतुल गुणगणाधार शौरे नमस्ते॥ ९ ॥

ऐश्वर्यं शङ्करादीश्वरविनियमनं विश्वतेजो हराणां
    तेजस्संहारि वीर्यं विमलमपि यशो निस्पृहैश्चोपगीतम्।
अङ्गासङ्गा सदा श्रीरखिलविदसि न क्वापि ते सङ्गवार्ता
    तद्वातागारवासिन् मुरहर भगवच्छब्दमुख्याश्रयोऽसि॥ १० ॥

——  **********  ——